अथान्नपूर्णा भैरवी ।
प्रणवं भुवनेशानि ! श्रीबीजं कामबीजकम् ।
हृदन्ते भगवत्यन्ते माहेश्वरिपदं तत: ।
अन्नपूर्णे ठयुगलं विद्येयं विंशदक्षरी ॥ १४ ॥”
इति तन्त्रसारे भैरवीमन्त्रपरिच्छेद: ॥ रागिणी-विशेष: । सा च भैरवरागस्य पत्नी । यथा,—
“भैरवी कौशिकी चैव भाषा वेलावली तथा ।
वङ्गाली चेति रागिण्यो भैरवस्यैव वल्लभा: ॥”
मतान्तरे मालवरागस्य पत्नी । यथा,—
धानसी मालसी चैव रामकीरी च सिन्धुड़ा ।
आशावरी भैरवी च मालवस्य प्रिया इमा: ॥”
अस्या ध्यानं यथा,—

“सरोवरस्था स्फटिकस्य मन्दिरे
सरोरुहै: शङ्करमर्चयन्ती ।
तालप्रयोगप्रतिबद्धगीति-
र्गौरीतनूर्नारद भैरवीयम् ॥”

अस्या गानसमय: पूर्व्वाह्णकाल: । यथा,—
“विभाषा ललिता चैव कामोदी पठमञ्जरी ।
रामकीरी रामकेली वेलोयारी च गुर्ज्जरी ॥
देशकारी च शुभगा पञ्चमी च गड़ा तुड़ी ।
भैरवी चाथ कौमारी रागिण्यो दश पञ्च च ।
एता: पूर्व्वाह्णकाले तु गीयन्ते गायनोत्तमै: ॥”
इति सङ्गीतदामोदर: ॥ * ॥
हनूमन्मते एषा सम्पूर्णजाति: । अस्या: सप्त-स्वरविन्यासक्रम: मध्यमपञ्चमधैवतनिषादषड्-जर्षभगान्धारान्त: । अस्या ग्रहं मध्यमस्वर: । शरद्दतौ प्रभाते अस्या गानसमय: । राग-मालायां अस्या: स्वरूपम् । अल्पवयस्का । सुरूपा । सुनेत्रा । विस्तारवदना । पिङ्गल-केशा । कोमलाङ्गी । रक्तवर्णा । श्वेतवसना । गलशोभितचम्पकमाला । प्रफुल्लपद्मयुक्तपर्व्वत-गुहायां शिवपूजापरायणा । तत्र मञ्जीर-वादका गायन्ति च ॥ * ॥ कल्लिनाथसोमे-श्वरभरतमतेष्वेवम् ॥

भैषजं, क्ली, (भेषजमेव संज्ञायां स्वार्थे वा अण् ।) लावकपक्षी । इति जटाधर: ॥ भेषजञ्च ॥

भैषज्यं, क्ली, ( भेषजमेवेति । भेषज+“अनन्ता-वसथेतिहभेषजाण् ञ्य: ।” ५ । ४ । २३ । इति ञ्य: । ) औषधम् । इत्यमर: । २ । ६ । ५० ॥ ( अस्य पर्य्यायो यथा,—
“भैषज्यं भेषजञ्चायुर्द्दमगदमौषधम् ॥”
इति वैद्यकरत्नमालायाम् ॥
“तदेव युक्तं भैषज्यं यदारोग्याय कल्पते ।”
इति चरके सूत्रस्थाने द्वितीयेऽध्याये ॥ )

भो:, [ स् ] व, ( भातीति । भा+बाहुलकाद् डोसि: ।) सम्बोधनम् । तत्पर्य्याय: । प्याट् २ पाट् ३ अङ्ग ४ हे ५ है ६ । इत्यमर: ।३।४।७॥ हंहो ७ हुम् ८ हो ९ अरे १० अये ११ अयि १२ । इति भरत: ॥ (यथा, मार्कण्डेये । ३ । ५२ ।
“भो भो विप्रेन्द्र ! बुध्यस्व बुद्ध्या बोध्यं बुधा-त्मक ! ।”)
प्रश्न: । विवाद: । इति शब्दरत्नावली ॥

भोक्तव्यं, त्रि, ( भुज+कर्म्मणि तव्यत् । ) भोज-नीयम् । भोज्यम् । यथा,—
“यत्नेन भगिनीहस्ताद्भोक्तव्यं पुष्टिवर्द्धनम् ।”
इति तिथ्यादितत्त्वम् ॥
“अलाबु वर्त्तुलाकारा वार्त्ताकी दुग्धवर्णिका ।
प्राणान्तेऽपि न भोक्तव्या दुग्धवर्णा कलम्बिका ॥”
इति कर्म्मलोचनञ्च ॥
( कर्म्मजन्ये अनुभवनीये । यथा च देवीभाग-वते । ११ । ७ । २८ ।
“प्रारब्धं किल भोक्तव्यं शुभं वाप्यथवा शुभम् ।
उद्यमस्तद्वशे नित्यं कारयत्येव सर्व्वथा ॥”)

भोक्ता [ ऋ ] त्रि, ( भुज्+कर्त्तरि तृच् ।) भोजनकर्त्ता । यथा,—

“यज्ञेश्वरो हव्यसमस्तकव्य-
भोक्ताव्ययात्मा हरिरीश्वरोऽत्र ।”

इति श्राद्धप्रयोगतत्त्वम् ॥
सुखादिभोगकर्त्ता यथा,—
“कर्त्ता च देही भोक्ता च आत्मा भोजयिता सदा ।
भोगो विभवभेदश्च निष्कृतिर्मुक्तिरेव च ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २३ अध्याय: ॥
अथ भोक्तुर्लक्षणं यथा, पाकराजेश्वरे ।

“स्नात: सुधौतमृदुसुन्दरशुक्लवासा-
स्तत्कालधौतचरण: सह पुत्त्रमित्रै: ।
स्रग्वी प्रसन्नहृदयो रसपाकवेद्यां
भोक्ता विशेच्च सततं हि सहात्मवेद्यै: ॥

मृदुतूलमये स्थूले चारुवस्त्रावगुण्ठिते ।
आसने प्राङ्मुखो भोक्तोपविशेद्वाप्युदङ्मुख: ॥”
( भोजनकर्त्तर्य्ये यथा,—
“यदा कारणमासाद्य भोक्तॄणां छन्दतोऽपि वा ।
अनेकद्रव्ययोनित्वाच्छास्त्रतस्तान् विनिर्द्दिशेत् ॥”
इति सुश्रुते सूत्रस्थाने ४६ अध्याय: ॥
“भोक्तारं विजने रम्ये नि:सम्बाधे शुभे शुचौ ।
सुगन्धिपुष्परचिते रम्ये देशेऽथ भोजयेत् ॥”
इति च तत्रैव तदध्याये ॥
यथा च सांख्यशास्त्रे भोक्ता भोगकर्त्ता पुरुष: । सति भोगस्थाने भोक्तृज्ञानं भवतीति तल्लक्षण-माह । “चिदवसानो भोग: ।” इति सांख्यसूत्रम् । १ । १०४ ॥ पुरुषस्वरूपे चैतन्ये पर्य्यवसानं यस्यैतादृशो भोग: सिद्धिरित्यर्थ: । राज्ञो भृत्यवर्ग: यथा, स्वामिने भोग्यजातमर्पयति, तथा, इन्द्रियाणि विषयजातं स्वस्वशक्त्या गृहीत्वा अन्त:करण-प्रतिविम्बिताय पुरुषाय अर्पयति, स च पुरुष: प्रतिविम्बग्रहणमात्रेण विषयजातं भुङ्क्ते प्रकाशयतीत्यर्थ: । पुरुषस्य भोग: प्रतिविम्बा-दानमात्रं अन्येषान्तु पुरुषादि: । ईदृश: परि-णामरूपो भोग: पुरुषे निषिध्यते । “बुद्धेर्भोग इवात्मनि ।” इत्यादिभिरिति । एतादृक् तया पुरुष: भोगकर्त्ता वा भोक्ता ॥” इति तद्भाष्ये विज्ञानभिक्षु: ॥

भोक्ता [ ऋ ] पुं, (भुङ्क्ते जीवरूपेणेति, भुनक्ति पालयतीति वा भुज+तृच् ।) विष्णु: । यथा,—
“भ्राजिष्णुर्भोजनं भोक्ता सहिष्णुर्जगदादिज: ।”
इति महाभारते तस्य सहस्रनामस्तोत्रम् ॥
भर्त्ता । इति हेमचन्द्र: । ३ । ६१ ॥

भोग:, पुं, ( भुज्यतेऽसौ इति । भुज+घञ् । ) सुखम् । स्त्र्यादिभृति: । पण्यस्त्रीणां भृति-र्भाड़ि: । आदिना हस्त्यश्वादिकर्म्मकराणाञ्च भृति: । सर्पस्य फटा । सर्पशरीरम् । इत्यमर-भरतौ । ३ । ३ । २३ ॥ (यथा, रघौ । ११ । ५९ ।

“लक्ष्यते स्म तदनन्तरं रवि:
बद्धभीमपरिवेशमण्डल: ।
वैनतेयशमितस्य भोगिन:
भोगवेष्टित इव च्युतो मणि: ॥”)

धनम् । ( यथा, ऋग्वेदे । ३ । ३४ । ९ ।
“हिरण्ययमुतभोगं ससान हत्वी दस्यून् प्रार्य्यं वर्णमावत् ॥”
“हिरण्ययं सुवर्णमयं भोगं धनम् ॥” इति तद्भाष्ये सायन: ॥ ) गृहम् । ( यथासुस्मिन्नेव मन्त्रे । “भोगशब्दव्याख्याने भुज्यतेऽस्मिन्निति भोगो गृहं वा ससान अर्थिभ्यो ददौ ।” इति सायन: ॥ ) पालनम् । अभ्यवहार: । इति मेदिनी । गे, १६ ॥ सर्प: । देह: । मानम् । इति शब्दरत्नावली ॥ * ॥ पुण्यपापजनयोग्य-काल: । यथा,—
“अतीतानागतो भोगो नाड्य: पञ्चदश स्मृत: ॥”
इति तिथ्यादितत्त्वे संक्रान्तिप्रकरणम् ॥
( पुरम् । यथा, ऋग्वेदे । ५ । २९ । ६ ।

“नव यदस्य नवतिञ्च भोगान्
साकं वज्रेण मघवा विवृश्चत् ।”

भोगान् पुराणि । इति तद्भाष्ये सायन: । )
भूम्यादीनां भोगो यथा । त्रिपुरुषभोगमाह व्यास: ।
“प्रपितामहेन यद्भुक्तं तत्पुत्त्रेण विना च तत् ।
तौ विना यस्य पित्रा च तस्य भागस्त्रिपौरुष: ॥
पिता पितामहो यस्य जीवेच्च प्रपितामह: ।
त्रयाणां जीवतां भोगो विज्ञेयस्त्वेकपूरुष: ॥
नारद: ।
तथारूढ़विवादस्य प्रेतस्य व्यवहारिण: ।
पुत्त्रेण सोऽर्थ: संशोध्यो न तं भोगो निवर्त्तयेत् ॥”
इति व्यवहारतत्त्वम् ॥
विभवभेद: । यथा,—
“कर्त्ता च देही भोक्ता च आत्मा भोजयिता सदा ।
भोगो विभवभेदश्च निष्कृतिर्मुक्तिरेव च ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २३ अध्याय: ॥
( व्यूहभेद: । यथा, कामन्दकीयनीतिसारे । १९ । अध्याये । ४१ । ४८ । ५४ । श्लोकेषु ॥
“यदि स्याद्दण्डवाहुल्यं तदा चाप: प्रकीर्त्तित: ।
मण्डलोऽसंहतो भोगो दण्डश्चेति मनीषिभि: ॥
गोमूत्त्रिका हि सञ्चारी शकटो मकरस्तथा ।
भोगभेदा: समाख्यातास्तथा परिपतन्तक: ॥
असंहतास्तु षड्व्यूहा भोगव्यूहाश्च पञ्चधा ॥”)